अश्वारूढा मन्त्राक्षरस्तोत्रम्

aśvārūḍhā mantrākṣarastotram

Link in Description

ओंकारभद्रपीठामुद्यन्मार्ताण्डमण्डलच्छायाम् ।
उल्लासिकमलवदनामुज्वलवेषामुपास्महे गोरीम् ॥ १ ॥

oṃkārabhadrapīṭhāmudyanmārtāṇḍamaṇḍalacchāyām .
ullāsikamalavadanāmujvalaveṣāmupāsmahe gorīm ..

Check Link in Description

आन्तरतमोनिहन्त्रीमाश्रयतामखिलमोहनाकाराम् ।
कलये कामपि करुणामरुणां गुरूणा प्रबोधितामन्तः ॥ २ ॥

āntaratamonihantrīmāśrayatāmakhilamohanākārām .
kalaye kāmapi karuṇāmaruṇāṃ gurūṇā prabodhitāmantaḥ .. 2 ..

Check Link in Description

ह्रींकारवाच्यरूपां हृतभक्तजनार्तिमिन्दुखण्डधराम् ।
अनुसन्धयामि विद्यामाद्यामश्वाधिरोहकौतुकिनीम् ॥ ३

hrīṃkāravācyarūpāṃ hṛtabhaktajanārtimindukhaṇḍadharām .
anusandhayāmi vidyāmādyāmaśvādhirohakautukinīm .. 3

Check Link in Description

क्रोडीभवन्मुकुन्दो हंसीभूतो विधिश्च यद्व्यक्तिम् ।
अनलमभूतां वेत्तुं तस्य स्थाणोर्भजे परां शक्तिम् ॥ ४॥

kroḍībhavanmukundo haṃsībhūto vidhiśca yadvyaktim .
analamabhūtāṃ vettuṃ tasya sthāṇorbhaje parāṃ śaktim .. 4..

Check Link in Description

एधन्ते निरपाया यच्चरणजुषां विभूतयो विदुषाम् ।
अश्वाधिरैहेणीं तामम्बामानन्दकन्दलीं बन्दे ॥ ५॥

edhante nirapāyā yaccaraṇajuṣāṃ vibhūtayo viduṣām .
aśvādhiraiheṇīṃ tāmambāmānandakandalīṃ bande .. 5..

Check Link in Description

हितमुपदिशमि चेतो विजहि हि वृद्धान्वयापरिभ्रमणम् |
परिहर वाहितमखिलं पशुपतिदयितापदाम्बुजस्मरणात् ॥६॥

hitamupadiśami ceto vijahi hi vṛddhānvayāparibhramaṇam |
parihara vāhitamakhilaṃ paśupatidayitāpadāmbujasmaraṇāt ..6..

Check Link in Description

परिहसितविद्रमलताप्रभया पर्याप्तमधुमदस्फुरणा ।
वागपिच वर्णयन्तीवद्गतिवल्गत्तुरङ्गमाहृदये ॥७॥

parihasitavidramalatāprabhayā paryāptamadhumadasphuraṇā .
vāgapica varṇayantīvadgativalgatturaṅgamāhṛdaye ..7..

Check Link in Description

रञ्जयति भुवनमखिलं वशयति वाणीं श्रियं समुन्नयति |
शमयति तमांसि पुसां चरणस्मृतिरेव शैलकन्यायाः ॥ ८ ॥

rañjayati bhuvanamakhilaṃ vaśayati vāṇīṃ śriyaṃ samunnayati |
śamayati tamāṃsi pusāṃ caraṇasmṛtireva śailakanyāyāḥ .. 8 ..

Check Link in Description

मेघश्यामलचिकुरां मीनध्वजविजयदीपिकाकलिकाम् ।
सुमुखीं तुरङ्गगसंस्थां सुलभां सौभाग्यदेवतामीडे ॥ ९ ॥

meghaśyāmalacikurāṃ mīnadhvajavijayadīpikākalikām .
sumukhīṃ turaṅgagasaṃsthāṃ sulabhāṃ saubhāgyadevatāmīḍe .. 9 ..

Check Link in Description

श्वः खलु न भवति यस्मात् तस्माद् अश्वश्चराचरो लोकः |
तमधिवसन्तीमम्बां अश्वारूढां वदन्ति तत्वविदः ॥ १० ॥

śvaḥ khalu na bhavati yasmāt tasmād aśvaścarācaro lokaḥ .
tamadhivasantīmambāṃ aśvārūḍhāṃ vadanti tatvavidaḥ .. 10 ..

Check Link in Description

रिक्तत्वं परिहर्तुं
कर्तुं स्कन्धाधिरोहणं करिणः |
वशयितुमपि वरमहिलां
वाञ्छसि यदि हृदि भावय भवानीम् ॥ ११ ॥

riktatvaṃ parihartuṃ
kartuṃ skandhādhirohaṇaṃ kariṇaḥ |
vaśayitumapi varamahilāṃ
vāñchasi yadi hṛdi bhāvaya bhavānīm .. 11 ..

Check Link in Description

स्वाभाविकारूणिम्ना सौभाग्यस्फुरणशालिना वपुषा ।
मदनद्विषोपि हृदयं वशयति या वस्तु वासना हृदि सा ।।१२।।

svābhāvikārūṇimnā saubhāgyasphuraṇaśālinā vapuṣā .
madanadviṣopi hadayaṃ vaśayati yā vastu vāsanā hadi sā ...12..

Check Link in Description

हारविकासिपयोधरभारानतमध्यचारुदेहलताम् ।
तरुणेन्दुमोलितरुणीमरुणामश्वाधिरोहिणीमीडे ॥ १३॥

hāravikāsipayodharabhārānatamadhyacārudehalatām .
taruṇendumolitaruṇīmaruṇāmaśvādhirohiṇīmīḍe .. 13..

Check Link in Description

पठतामनुवासरं जनानां परविद्याक्षरगर्भितां स्तुतिम्।
प्रभवत्यखिलार्थसंपदः सा प्रकृतिर्विंश्वमयी प्रसीदति ॥ १४ ॥।

paṭhatāmanuvāsaraṃ janānāṃ
paravidyākṣaragarbhitāṃ stutim.
prabhavatyakhilārthasaṃpadaḥ
sā prakṛtirviṃśvamayī prasīdati .. 14 ...

Check Link in Description